# Shri Kameshvara Kavacham

# શ્રીકામેશ્વરકવચમ્

## Document Information

Text title : kAmeshvarakavacham

File name : kAmeshvarakavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : vishvasAratantra

Latest update : January 10, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# Shri Kameshvara Kavacham

# શ્રીકામેશ્વરકવચમ્

ૐ શ્રીગુરવે શિવાર્યો નમઃ ।
શ્રીદેવ્યૈ સદાસુફલદાયિન્યૈ નમઃ ।
શ્રીદેવ્યુવાચ -
ભગવન્ કરુણામ્ભોધે શાસ્ત્રામ્ભોનિધિપારગ ।
દાસી પરમભક્તાસ્મિ વરં દાતુમિહાર્હસિ ॥ ૧॥

શ્રીભૈરવ ઉવાચ -
કથયસ્વ મહેશાનિ કમિતો વરમિચ્છસિ ।
યત્કિઞ્ચિન્મનસીષ્ટં સ્યાત્તદ્દાતું તે ક્ષમોઽસ્મ્યહમ્ ॥ ૨॥

શ્રીદેવ્યુવાચ -
કામેશ્વરસ્ય દેવેશ કવચં દેવદુર્લભમ્ ।
શીઘ્રં મે દયયા બ્રૂહિ યદ્યહં પ્રેયસી તવ ॥ ૩॥

શ્રીભૈરવૌવાચ -
શ ૃણુષ્વ પરમેશાનિ કવચં મન્મુખોદિતમ્ ।
મહાકામેશ્વરસ્યાસ્ય ન દેયં પરમાદ્ભુતમ્ ॥ ૪॥

યં ધૃત્વા યં પઠિત્વા ચ યં શ્રુત્વા કવચોત્તમમ્ ।
ત્રૈલોક્યાધિપતિર્ભૂત્વા સુખિતોઽસ્મિ મહેશ્વરિ ॥ ૫॥

તદેવં વર્ણયિષ્યામિ તવ પ્રીત્યા વરાનને ।
રહસ્યં પરમં તત્ત્વં ન દાતવ્યં દુરાત્મને ॥ ૬॥

અસ્યશ્રીકામેશ્વરકવચમન્ત્રસ્ય શ્રીદક્ષિણામૂર્તિ ઋષિઃ ।
પઙ્ક્તિ છન્દઃ । શ્રીકામેશ્વરો દેવતા ।
શ્રીં બીજં, હ્રીં શક્તિઃ, ક્લીં કીલકમ્ ।
ચતુર્વર્ગફલપ્રાપ્ત્યર્થે કવચપાઠે વિનિયોગઃ ।
અથ ધ્યાનમ્ ।

ઉદ્યચ્ચન્દ્રસમાનદીપ્તિમમૃતાનન્દૈકહેતું પરં
ચિદ્રૂપં ભુવનૈકસૃષ્ટિપ્રલયોદ્ભૂતૈકરક્ષાપરમ્ ।
કોટી ચન્દ્રગલત્સુધાદ્ભુતતનું હારાદિભૂષોજ્જ્વલં
શુલં ખડ્ગવરૌ તથાભયકરં કામેશ્વરં ભાવયે ॥

ઐઁ કં કામેશ્વરઃ પાતુ ક્લીં શિવો મે લલાટકમ્ ।
સૌં મે કર્ણૌ ચ કામેશઃ તારં મે લોચનદ્વયમ્ ॥ ૧॥

શ્રીં ગં ડૌં મે મહાકાલો હ્રીં નાસાં ચન્દ્રચૂડકઃ ।
હં મે ઓષ્ટૌ ત્રિપુરેશઃ સં મે દન્તૌ ચ ભૈરવઃ ॥ ૨॥

ક્ષં મે જિહ્વાં પાતુ દેવો મહાકામેશ્વરઃ પરઃ ।
સમ્મોહનં સદા પાતુ મહાવટુકભૈરવઃ ॥ ૩॥

યં મે સ્કન્ધૌ સદા પાતુ મહામૃત્યુઞ્જયસ્તથા ।
ઊં મે ભુજૌ સદા પાતુ શ્રીં દેવસ્ત્રિપુરાન્તકઃ ॥ ૪॥

સં મે હસ્તૌ ત્રિલોકેશઃ હં નખાન્ પાતુ સુન્દરઃ ।
ક્ષં દક્ષઃ પાતુ શામેશો મં કુક્ષિં કૃત્તિકા વરઃ ॥ ૫॥

લં પાર્શ્વૌ પાતુ મે બાલા વં નાભિં બ્રહ્મભૂષકઃ ।
રં વસ્તિં પાતુ મે દેવો યં પૃષ્ઠં વિષ્ણુરૂપકઃ ॥ ૬॥

ઊં શિશ્નં પાતુ વિશ્વેશઃ અમૃતેશ્વરભૈરવઃ ।
યં મેઢ્રે પાતુ મે રુદ્રો રં ગુહ્યં ગુહ્યકેશ્વરઃ ॥ ૭॥

લં કટિં પાત મે નિત્યં શિવઃ પરમકારણઃ ।
વં ઊરૂ ત્રિપુરાધ્યક્ષઃ લં જાનૂ દેવપાલકઃ ॥ ૮॥

મં જઙ્ઘે પાતુ મહિમા યં ગુલ્ફૌ સૂર્યરૂપકઃ ।
શ્રીં જઠરં હરઃ પાતુ હ્રીં મનોહરસુન્દરઃ ॥ ૯॥

ૐ બુદ્ધિં પાતુ મે રુદ્રઃ સૌઃ રસં દક્ષજાપતિઃ ।
ક્લીં રક્તં પાતુ મે દેવો ઊર્ધ્વં ચ વહ્નિરૂપધૃક્ ॥ ૧૦॥

ઐં સૌં સં ગુહ્યકઃ પાતુ મેરુઃ પશુપતિસ્તથા ।
અસ્થિં મે ગિરિજાનાથો મજ્જાં મે નીલકણ્ઠકઃ ॥ ૧૧॥

શુક્રં ભૂતેશ્વરઃ પાતુ મૂર્ધાનં શઙ્કરોઽવતુ ।
પાદૌ શ્રીં સુન્દરીશાનો દેવઃ કાલાન્તકઃ પ્રભુઃ ॥ ૧૨॥

પાદાદિશિરઃપર્યન્તમઘોરઃ પાતુ સર્વદા ।
શિરસઃ પાદપર્યન્તં સદ્યોજાતો મમાવતુ ॥ ૧૩॥

પ્રૌઢરૂપઃ સદા પાતુ સ્વાહા મે સકલં વપુઃ ।
કામેશ્વરઃ પ્રભાતેઽવ્યાન્મધ્યાહ્ને કાલભૈરવઃ ॥ ૧૪॥

સાયં પાતુ કુલેશાનો નિશીથે નિષ્કલેશ્વરઃ ।
અર્ધરાત્રે વામદેવો નિશાન્તે સુમહોદયઃ ॥ ૧૫॥

સર્વદા સર્વતઃ પાતુ ઐં ક્લીં સૌં બીજરૂપધૃક્ ।
પૂર્વે મામસિતાઙ્ગોઽવ્યાત્ દક્ષિણે રુરુભૈરવઃ ॥ ૧૬॥

પશ્ચિમે પાતુ ચણ્ડેશો હ્યુત્તરે ક્રોધભૈરવઃ ।
ઐશાન્યાં પાતુ ચોન્મત્તઃ કપાલેશસ્તથાગ્નિકે ॥ ૧૭॥

નૈરૃત્યાં ભીષણઃ પાતુ વાયૌ સંહારકોઽવતુ ।
ઊર્ધ્વં મે કાલરુદ્રશ્ચ પાતાલે પરમેશ્વરઃ ॥ ૧૮॥

મધ્યે સદાશિવઃ પાતુ ત્રિકૂટેશઃ સદાવતુ ।
દશદિક્ષુ સદા પાતુ મહાકામેશ્વરોઽવતુ ॥ ૧૯॥

વિસ્મારિતં ચ યત્સ્થાનં યત્સ્થાનં નામવરર્જિતમ્ ।
તત્સર્વં પાતુ મે દેવસ્ત્રિપુરઃપતિરીશ્વરઃ ॥ ૨૦॥

ગૃહે શર્વઃ સદા પાતુ બહિઃ પાયાદ્વૃષધ્વજઃ ।
પથિ ત્રિપુરસુન્દર્યઃ પાતુ સર્વત્ર સર્વદા ॥ ૨૧॥

રણે રાજકુલે દુર્ગે દુર્ભિક્ષે શત્રુસંસદિ ।
દ્યૂતે મારીભયે રાષ્ટ્રે વિપ્લવે વાદિનાં કુલે ॥ ૨૨॥

કામેશ્વરઃ સદા પાતુ ભયસ્થાને ચ સર્વદા ।
ઇત્યેતત્કવચં ગુહ્યં ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૨૩॥

મૂલમન્ત્રમયં દિવ્યં ત્રિલોકીસારમુત્તમમ્ ।
અદાતવ્યમભક્તાય કવચં ગુહ્યમીશ્વરિ ॥ ૨૪॥

અદૃષ્ટવ્યમશ્રોતવ્યં દીક્ષાહીનાય મન્ત્રિણે ।
પરદીક્ષાય શિષ્યાય પુત્રાય શરજન્મને ॥ ૨૫॥

ન દાતવ્યં ન શ્રોતવ્યમિત્યાજ્ઞાં મામકીં શ‍ૃણુ ।
પરં શ્રીમહિમાનં ચ શ‍ૃણુ ચાસ્ય સુવર્મણઃ ॥ ૨૬॥

અદીક્ષિતો યદા મન્ત્રી વિદ્યાં ગૃધ્નુઃ પઠેદિદમ્ ।
સુશિક્ષિત ઇતિ જ્ઞેયો માન્ત્રિકઃ સાધકોત્તમઃ ॥ ૨૭॥

ગુરુપૂજાં વિધાયાસ્ય વિધિવત્પ્રપઠેત્તતઃ ।
કવચં ત્રિઃસકૃદ્વાપિ યાવજ્જ્ઞાનં ચ વા પુનઃ ॥ ૨૮॥

એતચ્છતાર્થમાવર્ત્ય ત્રૈલોક્યવિજયી ભવેત્ ।
યઃ પઠેન્મનસાન્તસ્તુ રાત્રૌ બ્રાહ્મે મુહૂર્તકે ॥ ૨૯॥

પૂજાકાલે નિશીથે તુ તસ્ય હસ્તસ્ય સિદ્ધ્યઃ ।
દુઃસ્વપ્ને બન્ધને ઘોરે કાન્તારે સાગરે ભયે ॥ ૩૦॥

રજઃસત્ત્વતમોરૂપવર્મ કામેશ્વરસ્ય તુ ।
કાઙ્ક્ષન્તે મનસા યદ્યત્તત્તત્પ્રાપ્નોતિ સાધકઃ ॥ ૩૧॥

મહાકવિર્ભવેન્માસાત્સર્વસિદ્ધીશ્વરો ભવેત્ ।
કુઙ્કુમેન લિખિત્વા વૈ ભૂર્જત્વચિ રવૌ દિને ॥ ૩૨॥

પ્રાતઃકાલે શુભર્ક્ષે ચ સ્વર્ણસ્થં ધારયેદ્યદિ ।
શિખાયાં દક્ષિણે બાહૌ કણ્ઠે વા ધારયેદ્બુધઃ ।
યદ્યદિષ્ટં ભવેત્તત્તત્સાધકો લભતેઽચિરાત્ ॥ ૩૩॥

યદ્ગૃહે વર્તતે વર્મ શ્રીકામેશ્વરદૈવતમ્ ।
વિદ્યાકીર્તિર્ધનારોગ્યં લક્ષ્મીર્વૃદ્ધિર્ન સંશયઃ ॥ ૩૪॥

વિના બલિં ન સંરક્ષ્યં કવચં સાધકત્તમૈઃ ।
ચેદ્રક્ષ્યં તત્સુતાન્ દારાન્નાયુર્ભક્ષતિ યોગિની ॥ ૩૫॥

બલિં દત્વા પઠેદ્વર્મ ધારયેન્મૂર્ધ્નિ સાધકઃ ।
પુત્રવાન્ ધનવાન્ શ્રીમાન્ નાનાવિદ્યાનિધિર્ભવેત્ ।
ઇહ ભોગાન્ સમશ્નાતિ પરત્ર મુક્તિભાગ્ભવેત્ ॥ ૩૬॥

બ્રહ્માસ્ત્રાદીનિ શસ્ત્રાણિ તદ્ગાત્રસ્પર્શનાત્તતઃ ।
નાશમાયાતિ સર્વત્ર કવચસ્યાસ્ય ધારણાત્ ॥ ૩૭॥

મૃતવત્સા વામબાહૌ કવચસ્યાસ્ય ધારણાત્ ।
બહ્વપત્યા જીવવત્સા ભવત્યેવ ન સંશયઃ ॥ ૩૮॥

રણેષ્ટ્વાચરેદ્યુદ્ધં હત્વા શત્રૂન્ જયં લભેત્ ।

જયં કૃત્વા ગૃહં દેવિ સ પ્રાશ્યતિ સુખી નરઃ ॥ ૩૯॥

મહાભયે મહાઘોરે મહામારીભયે તથા ।
દુર્ભિક્ષે શત્રુસઙ્ગ્રામે પઠેત્કવચમાદરાત્ ।
સર્વં તત્પ્રશમં યાતિ કામેશ્વરપ્રસાદતઃ ॥ ૪૦॥

કવચસ્યાસ્ય દેવેશિ વર્ણિતું નૈવ શક્યતે ।
મહિમાનં મહાદેવિ જિહ્વાકોટિશતૈરપિ ॥ ૪૧॥

ઇદં કવચમજ્ઞાત્વા યો જપેત મનું શિવે ।
સપ્તલક્ષપ્રજપ્તાપિ તસ્ય વિદ્યા ન સિદ્ધ્યતિ ॥ ૪૨॥

અદાતવ્યમિદં વર્મ મન્ત્રગર્ભં રહસ્યકમ્ ।
અવક્તવ્યં મહાપુણ્યં સર્વસારસ્વતપ્રદમ્ ॥ ૪૩॥

અદીક્ષિતાય નો દદ્યાત્ કુચૈલાય દુરાત્મને ।
ન દેયં પરશિષ્યેભ્યોઽભક્તેભ્યોઽપિ વિશેષતઃ ॥ ૪૪॥

શિષ્યેભ્યો ભક્તિયુક્તેભ્યઃ પ્રદેયં ભાવનાવશાત્ ।
ઇતિ શ્રીદેવદેવેશિ વર્મ કામેશ્વરસ્ય તુ ।
ગુહ્યં ગોપ્યતમં ગોપ્યં કથિતં તવ ભક્તિતઃ ॥ ૪૫॥

ઇત્યેષ પટલો દેવિ પરમાદ્ભુતકારણઃ ।
કથિતો દેવદેવેશિ તવ ભક્તિવશાન્મયા ॥ ૪૬॥

ન વક્તવ્યો ન દાતવ્યો દીક્ષાહીનાય પાર્વતિ ।
યથાવદ્ગોપનીયોઽસૌ સિદ્ધ્યષ્ટકફલો મતઃ ॥ ૪૭॥

યાવત્કાલં ભવેદ્ગુપ્તસ્તાવત્તુ ફલદાયકઃ ।
ન ચેદ્ગુપ્તો ભવેદ્દેવિ સિદ્ધિહાનિર્ભવેદ્ધ્રુવમ્ ॥ ૪૮॥

રહસ્યોદ્ઘાટનાયાસ્માન્મહિમા હીયતાન્મનોઃ ।
તસ્માત્સર્વત્ર ગોપ્તવ્યઃ સાયકૈઃ પટલોત્તમઃ ।
યથેષ્ટકામદશ્ચેહ પરત્ર મોક્ષદઃ પ્રિયે ॥ ૪૯॥

ઇતિ શ્રીવિશ્વસારતન્ત્રે પાર્વતીપરમેશ્વરસંવાદે
શ્રીકામેશ્વરકવચં સમ્પૂર્ણમ્ ॥

Encoded from handwritten manuscript and proofread by
PSA Easwaran

*Shri Kameshvara Kavacham*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*